# सप्तमोऽङ्कः ।

(नेपथ्ये ।)

**लब्ध्वा साम्राज्यलक्ष्मीं निजभुजविजितां किञ्च कान्तां वियुक्तां**
**स्वीयां प्रेष्ठां कयाधुं दनुजपरिवृढो गाढनिद्रावशोऽभूत् ।।**
**सोऽयं प्रातः सहर्षं त्वरितमुपगतैर्बोधितो बन्दिवर्गैः**
**प्राप्तः स्वोद्यानशोभासुखमनुभवितुं सोष्ट्रगन्धोऽरुणाक्षः ।।१।।**

(ततः प्रविशति यथानिर्दिष्टो हिरण्यकशिपुः ।)

(प्रविश्य ।)

**हिरण्यकशिपुः** - सखे पश्य पश्य ।

**निरलसजनविद्येवोन्नता पङ्कजश्रीर् -**
**गुणिन इव सुदेशे मोदमायन्ति भृङ्गाः ।।**
**सुनृपतिरिव सूर्यो मोदयत्याशु लोकान्**
**धनमिव सुकृतीनां सार्थतामेति चक्षुः ।।२।।**

**उष्ट्रगन्धः** - (सस्मितम् ।) महाराज एवमेव परम् अद्यतननिशा कीदृशी संवृत्ता ।

**हिरण्यकशिपुः** - (सस्मितम् ।) (सौख्यस्मरणमभिनीय ।) सखे किं कथयामि ।

**क्रूरतपःसम्भूतं लोकभ्रमणोत्थमुग्रदुःखं मे ।।**
**नष्टं प्रियाङ्गसङ्गात्प्राप्ता पुष्टिः प्रियाधरामृततः ।।३।।**

तेन किं वर्णयाम्यद्यतननिशायाः सौभाग्यम् ।

**उष्ट्रगन्धः** - (सशिरःकम्पम् ।) एवमेव यदाह महाराजः । अद्यावयोस्तौल्यं संवृत्तम् ।

**हिरण्यकशिपुः** - (सस्मितम् ।) कथमिव ।

**उष्ट्रगन्धः** - महाराजेन न ज्ञातम् ।

**हिरण्यकशिपुः** - नहि नहि कथय ।

**उष्ट्रगन्धः** - महाराजेन त्वन्तःपुरे देव्या सह शय्यासुखमनुभूय निद्रावशेन पारितोषिकलिप्सुबन्दिवर्गगिरा प्रबुद्धम् । मया बहिःपुरे मत्कुणावल्या

सह खट्वासुखमनुभूय निद्रावशेन बीभत्सलिप्सुकाककुलकलकलेन प्रबुद्धं प्राप्तं चाप्युद्यानशोभामवलोकयितुम् ।

**हिरण्यकशिपुः** - (सोपहासम् ।) अहो तौल्यम् ।

**उष्ट्रगन्धः** - (निपुणं निरीक्ष्य ।) नहि नहि आधिक्यमस्ति ।

**हिरण्यकशिपुः** - कीदृशं तत् ।

**उष्ट्रगन्धः** - न जाने महाराजस्तु देवीसहचरोऽपि केन हेतुना सक्षताङ्गः अहं तावदेकोऽपि अक्षताङ्गः ।

**हिरण्यकशिपुः** - (सस्मितम् ।) सत्यमुक्तं परं किं त्वं निष्परिग्रहः ।

**उष्ट्रगन्धः** - (साञ्जलिबन्धम् ।) नहि नहि महाराजस्य कृपया सर्वोऽपि दासीजनोऽस्ति ममैव परिग्रहस्तेन सपरिग्रहोऽहं कृतमनया शङ्कया ।

**हिरण्यकशिपुः** - (सोपहासम् ।) रे निस्त्रपः सञ्जातोऽसि येनैवं प्रलपसि ।

**उष्ट्रगन्धः** - हुं महाराजस्य प्रसादेन ।

**हिरण्यकशिपुः** - धिङ्मूर्ख कथमिव ।

**उष्ट्रगन्धः** - त्रपापरवशस्तु भीरुर्भवति अहं तु महाराजस्य प्रसादेन निर्भयस्तेन निस्त्रपः सञ्जातः । (इति करतालं दत्वा नृत्यति ।)

**हिरण्यकशिपुः** - (तं करे धृत्वा ।) अलमुपहासप्रसङ्गेन स्वधर्माचरणमुख्यकाले प्रातःकाले।

**उष्ट्रगन्धः** - तर्हि किं करोमि ।

**हिरण्यकशिपुः** - पश्य तावत्प्रातःकालस्योद्यानस्य च रामणीयकमतिमात्रम् ।

**उष्ट्रगन्धः** - हुं पश्याम्युभाभ्यां नेत्राभ्यां महाराजस्याज्ञया । (इत्यङ्गुष्ठतर्जनीभ्यां नेत्रे प्रसार्य परिपश्यन् ।) पवमानप्रभावेण वृद्धतापसा इव वृक्षाः कम्पन्ते पतन्ति च तत्कचचया इव तत्पुष्पप्रकराः अश्मसङ्घा इव निपतन्ति फलसमूहाश्च क्षुधार्दिता अतिदरिद्रबालका इव कुर्वन्ति कोलाहलं शकुन्ताः भिक्षुक इव कुरुते करप्रसारं प्रभाकरः प्रभाते प्रभोः पुरस्तात् पश्यतु महाराजः ।

**हिरण्यकशिपुः -** अहो वर्णनवैदग्ध्यं वैधेयाधिपतेः । यत्सरसोऽपि पदार्थो नीरस इव भासते श्रवणेन तेन कृतं कृतमनेन वाग्विभवेन ।

**उष्ट्रगन्धः -** हुम् एवं चेत्किं करोमि ।

**हिरण्यकशिपुः -** शृणु तावद्रामणीयकं वर्णयामि ।

**उष्ट्रगन्धः -** हुं तर्हि श्रोतुकामोऽहम् ।

**हिरण्यकशिपुः -**

**सरलसमीरणतरलाः स्कन्धकराः पर्णकर्णतालयुताः ।।**
**मञ्जरिदन्ताकलिताः कुसुममदाम्बुप्रवर्षिणो नीलाः ।।४।।**

**वितता दृढाश्च तुङ्गाः क्षितिजाता भान्ति संस्थिताः परितः ।।**
**बालोद्यानं गोप्तुं मदनमहीशस्य करिवराः किन्नु ।।५।।**

**यद्वा लतिकाश्लिष्टाः पत्त्रिकुलालापभाषिणो रम्याः ।।**
**सुमनोगुच्छवतंसा विलासिसाम्यं प्रदर्शयन्त्येते ।।६।।**

**उष्ट्रगन्धः -** अहह भ्रान्तोऽहम् एते करिणो विलासिनो वा ।

**हिरण्यकशिपुः -** धिङ्मूर्ख एते वृक्षाः ।

**उष्ट्रगन्धः -** हुम् एवं चेन्मिथ्याभाषी महाराज इत्यद्यैव बुद्धम् ।

**हिरण्यकशिपुः -** रे नहि नहि वाक्चातुर्यमिदम् । शृणु तावत्

**बहुतरकुसुमाच्छन्नस्वाधोदेशास्तु सूचयन्त्येते ।।**
**छत्राकृतिका नृपतेः कुसुमशरस्यात्र संस्थितिं मोदात् ।।७।।**

(किञ्चिदग्रतो गत्वाऽङ्गुल्या निर्दिश्य।)

**मार्दवसौरभवर्णैर्देव्या पाटललता जिता तस्मात् ।।**
**कण्टकितेयं नूनं पश्य सखे त्वं मृषा न मे वाणी ।।८।।**

**उष्ट्रगन्धः -** महाराज एवमेव अहमपि कण्टकितोऽस्मि । (इति अङ्गुष्ठतर्जनीभ्यां श्मश्रूणि दर्शयति ।)

**हिरण्यकशिपुः -** रे विकलोऽसि किम् ।

**उष्ट्रगन्धः** - हुम् आनन्दविकलोऽस्मि ।

**हिरण्यकशिपुः** - कुतः ।

**उष्ट्रगन्धः** - यतो महाराजेन देव्या च त्रिलोकी जिता ।

**हिरण्यकशिपुः** - रे मुखर अस्माभिस्त्रिलोकी जितेति सर्वैरनुभूतं न तु देव्या जितेति ।

**उष्ट्रगन्धः** - नहि नहि उभाभ्यां मिलित्वा जिता ।

**हिरण्यकशिपुः** - कथमिव ।

**उष्ट्रगन्धः** - चराणि सर्वाण्यपि महाराजेन जितानीति प्रसिद्धं स्थावराणीमानि च देव्या जितानीति महाराजेनैव प्रतिपादितमिति तथा ब्रवीमि ।

**हिरण्यकशिपुः** - (सस्मितम् ।) अहो सुष्ठु समर्थितं परं साम्प्रतं वर्णनामृतपाने वाग्रोधं वृथा मा कृथाः ।

**उष्ट्रगन्धः** - हुं तर्हि भित्तिरिव तूष्णीं भूत्वा शृणोमि ।

**हिरण्यकशिपुः** - (पदान्तरं गत्वा ।)

**चम्पककेतककेसरकुसुमसमुत्थं परागपटलमिदम् ।।**
**ससुगन्धं सौवर्णं कुरुते व्योमाङ्गणं रवेः किरणैः ।।९।।**

(पुनरग्रतो गत्वा ।)

**धीरसमीरसमीरणचलकदलीकुलानि मन्येऽहम् ।।**
**सूर्यकराक्ताँश्चपलान् अभिनववारिप्रपूरितान् मेघान् ।।१०।।**

(किञ्चिदग्रे गत्वा ।)

सखे पश्य तावदच्छाच्छस्फटिकचयरचितप्रान्तनितान्तकान्तं विविध-विकचवनरुहसमूहसुषमातिरेकेण नेत्रासेचनकं तन्मरन्दामन्दरसनरसिक-ललल्लोलम्बलीलाझङ्कृतिमुखरं तारमणिप्रतिमनिर्मलशिशिरसुरभि-सलिलैर्लीलोचितं बहुवर्णविचित्रतरशफरीगणचरणमनोज्ञं निजचञ्चु-पुटच्युतमुक्ताफलपटलं स्वीयकान्त्या भर्त्सयतां राजहंसानां कलरव-प्रतिरवमुखरितं प्रतीराकल्पकल्पानल्पस्वर्णजातिजातिमल्लिकादिम-कुसुमस्तबकसौष्ठवाढ्यं कुल्याकुलमलङ्करोति बालोद्यानम् । तदुपकण्ठे

किल कनकलतावलितमण्डपिका बालोद्यानमण्डनभूताऽगणितमणिगणकिरणकिर्मीरितमृदुतरवेदिकाऽऽवेदयति दर्शनमात्रेण स्थितिसुखम् ।

**उष्ट्रगन्धः** - ममापि पादौ परिभ्रमणेन प्रपीडितावित्यलङ्करोतु एनां वेदिकां महाराजः।

**हिरण्यकशिपुः** - (तथा कृत्वा । सूर्यमवलोक्य ।)

**प्राचीं रागवतीं कृतकराभिमर्शां प्रसाधयितुमेषः ।।**
**बहुपुष्पाढ्ये कुरुते बालोद्याने करप्रसारं किम् ।।११।।**

यद्वा ।

**दृष्ट्वा मां चण्डकरं प्राचीरागान्वितं ध्रुवं छाया ।।**
**लीनेत्येतां धर्त्तुं बहुकरविसृतिं करोति मिहिरोऽयम् ।।१२।।**

अथवा ।

**नागैर्द्विजैर्निषेव्यः सुमनःश्लाघ्यः सुपत्रकः सूच्चः ।।**
**स्वच्छायामोदकरः सुरवर्त्मनि चन्दनद्रुमः सूर्यः ।।१३।।**

अथवा ।

**सञ्चारयति सदेमां सूर्याह्वां हस्तदीपिकां कालः ।।**
**सुरवर्त्मनि तज्जन्यां जननिचयो दृश्यते तमःकपटात् ।।१४।।**

**उष्ट्रगन्धः** - किञ्चिद्विज्ञाप्यमस्ति ।

**हिरण्यकशिपुः** - कथय ।

**उष्ट्रगन्धः** - महाराजवर्णितेषु पदार्थेष्वेकस्मादपि पदार्थाद्बिन्दुरपि नो निपतितः ।

**हिरण्यकशिपुः** - बिन्दोर्निपतनस्य किं कारणम् ।

**उष्ट्रगन्धः** - महाराजेन पूर्वं भणितं यत्त्वद्वर्णनेन सर्वोऽपि पदार्थो नीरस इव भासते परं महाराजवर्णितेष्वेतेष्वेकस्मादपि बिन्दुरपि नो निपतितस्तत्किम् ।

**हिरण्यकशिपुः** - (सन्यक्कारम् ।) धिग्वैधेय । सरसो नाम रसोद्दीपकः स पदार्थो भवति ।

**उष्ट्रगन्धः** - एवं चेद्दीपको मन्मुखे मा तिष्ठतु वरं नीरसत्वम् ।

**हिरण्यकशिपुः -** रे जाल्म उद्दीपको नाम प्रोल्लासकः न तु दीपकः ।

**उष्ट्रगन्धः -** एवं चेत्समञ्जसम् । (ऊर्द्ध्वमवलोक्य ।) महाराज ज्वलत्काष्ठप्रपूरितां चुल्लीं वास इव प्रच्छादयत्युष्णाभीषुमभ्रम् ।

**हिरण्यकशिपुः -** (सहासम् ।) रे किं चित्रमत्र वर्षर्तौ । पश्य ।

**क्षणाच्चण्डायते सूर्यः क्षणाच्चन्द्रायते पुनः ।।**
**औष्ण्यादभ्राच्च वर्षर्तौ चलहृत्सङ्गतो यथा ।।१५।।**

**उष्ट्रगन्धः -** हुं तथैवानुभूयते । (पुनरूर्द्ध्वमवलोक्य ।) आश्चर्यम् आश्चर्यं मेघा अपि महाराजभयान्मूत्रमुद्गिरन्ति ।

**हिरण्यकशिपुः -** (सहासम् ।) रे मुखरापसद सुखितजनमानसानन्ददायिनी वृष्टिरियं समागता परमहमेवं मन्ये ।

**(युग्मम् ।)**

**मदलङ्करणे निरता रविशशितारासः समुज्ज्वला एतैः ।।**
**मलिनतरैर्ननु जलदैर्नीता मालिन्यमुन्नताः सहसा ।।१६।।**

**इत्याकाशः सरसावसरे चिन्तापरो मुहुर्मलिनः ।।**
**विघटितधन इव मनुजो रोदित्यासारकपटेन ।।१७।।**

अथवा ।

**मय्येव विश्वं निखिलं च भूतेष्वाद्योऽहमस्मि प्रथितस्तथापि ।।**
**शून्यं वदन्तीति विचिन्त्य रोदित्याकाश आसारमिषेण पश्य ।।१८।।**

**उष्ट्रगन्धः -** हन्त हन्त कृपालुः खलु महाराजस्तेन समाश्वासनीयोऽयम् ।

**हिरण्यकशिपुः -** रे मूर्ख वाक्चातुर्यमिदमिति पूर्वोदितं नानुसन्धत्से ।

**उष्ट्रगन्धः -** (कर्णं धृत्वा ।) हुं हुं विस्मृतं मया ।

**हिरण्यकशिपुः -** शृणु ।

**विद्युज्ज्वालबृहत्तापद्रवीभूतस्य साम्प्रतम् ।।**
**आकाशमुकुरस्यायं धारापातः प्रदृश्यते ।।१९।।**

(पुनरूर्ध्वमवलोक्य ।)

**ताम्राभ्रपटलं भाति नवाम्बुदसमुच्चये ।।**
**प्रक्षिप्तं शीतलीकर्तुं तप्तताम्रं नु पल्वले ।।२०।।**

(सर्वतोऽवलोक्य सस्मितम् ।)

रे पुरुषपशो सर्वेभ्यः पदार्थेभ्यः सरसतया निपतन्ति बहवो बिन्दवस्तान् विलोकय स्वविलोचनाभ्याम् ।

**उष्ट्रगन्धः** - (अङ्गुष्ठतर्जनीभ्यां नेत्रे प्रसार्य ।) हुं विलोकयामि महाराजस्य भयेनैतदभूत् न तु वर्णनेन ।

**हिरण्यकशिपुः** - (सस्मितं करतालं दत्वा ।) रे धूर्तधुरन्धरोऽसि ।

**उष्ट्रगन्धः** - (सशिरःकम्पम् ।) हुं महाराजस्य सङ्गतेः प्रभावः ।

**हिरण्यकशिपुः** - (सस्मितं तूष्णीं तिष्ठति ।)

(ततः प्रविशति पटाक्षेपेण कञ्चुकी ।)

(प्रविश्य ।)

**कञ्चुकी** - विजयतां महाराजः । निवेदयति सर्वोऽपि परिजनः स्नानोपकरणानि सज्जानि तानि सफलीकरोतु महाराज इति ।

**हिरण्यकशिपुः** - भद्र समयोचितमेव निवेदितम् । भद्र उष्ट्रगन्ध एहि स्नानादिक्रियां निर्वर्त्तयावः ।

**उष्ट्रगन्धः** - स्नानादिक्रियां निर्वर्त्तयतु महाराजः । अहं तु यदा जातस्तदैव स्नातः परं भोजनोपकरणानि मम सज्जानि तानि सफलीकर्तुं गच्छामि ।

(इति निष्क्रान्तौ ।)

**(मिश्रविष्कम्भकः ।)**

(नेपथ्ये ।)

**सम्मार्ज्य नव्यागुरुतोयसिक्तं**
**सभास्थलं मंक्षु विधाय किञ्च ।।**

**सिंहासनं तत्र निधाय भृत्या**
**मृद्वास्तरैरास्तरणं कुरुध्वम् ।।२१।।**

(ततः प्रविशति सालङ्कारः सपरिवारो हिरण्यकशिपुः ।)

**हिरण्यकशिपुः -** (प्रविश्य सिंहासन उपविशति ।)

(सर्वे स्वे स्वे स्थान उपविशन्ति ।)

**हिरण्यकशिपुः -** भद्र विद्युद्दंष्ट्र शृणु मद्वचनम् ।

**विद्युद्दंष्ट्रः -** (सविनयमुत्थायाञ्जलिं बद्ध्वा ।) आज्ञापयतु महाराजः ।

**हिरण्यकशिपुः - राज्यं ममैव सर्वत्र....**

**विद्युद्दंष्ट्रः -** देव तवैव राज्यं तिलपरिमितं किमप्यन्यसत्ताकं न पश्यामि ।

**हिरण्यकशिपुः - ....सुखिनः स्वजनाः किमु ।।**

**विद्युद्दंष्ट्रः -** प्रभो त्वन्नाथानां कुतस्तरां दुःखम् ।

**हिरण्यकशिपुः - नष्टाः किं शत्रवः सर्वे....**

**विद्युद्दंष्ट्रः -** तेषां गन्धमपि मनसा न सम्भावयामि ।

**हिरण्यकशिपुः - ....स्वस्थोऽहं तर्हि बन्धुभिः ।।२२।।**

**विद्युद्दंष्ट्रः -** महाराज नित्यमिदमेव वयं सर्वेऽप्याशास्महे ।

**हिरण्यकशिपुः -** (सहर्षम् ।) भद्र स्वस्थानमलङ्कुरु ।

**विद्युद्दंष्ट्रः -** (सविनयमुपविशति ।)

**हिरण्यकशिपुः -** (सभक्त्यानन्दम् ।)

**मदुत्कर्षद्रुमोत्सेधकारणं रणमूर्द्धनि ।।**
**सर्वत्रापि च मन्येऽहं भार्गवानुग्रहामृतम् ।।२३।।**

**विद्युद्दंष्ट्रः -** यथाह महाराजस्तथैव ।

(नेपथ्ये ।)

(मङ्गलवाद्यध्वनिः । सर्वेऽपि ससम्भ्रमाह्लादमाकर्णयन्ति ।)

(ततः प्रविशति शुद्धान्तचरः कञ्चुकी ।)

**कञ्चुकी** - (प्रविश्य । सानन्दसम्भ्रमम् ।) विजयतां दैत्येन्द्रः । श्रवणामृतं पुत्रजननं श्रावयामि ।

(सर्वेऽपि साधु साध्विति प्रशंसन्ति ।)

**हिरण्यकशिपुः** - (साह्लादम् । स्वकराभ्यामुत्तार्य कटकौ तस्मै प्रयच्छति ।)

**कञ्चुकी** - महाराजप्रसादः । (इति सानन्दं धारयन् ।) महाराज गच्छामि शुद्धान्तम् आगच्छति जन्मपत्रिकां गृहीत्वा गुरुपुत्रः । (इति निष्क्रान्तः ।)

(ततः प्रविशति गन्धाक्षतचर्चितभालः पत्रिकाहस्तः शण्डः ।)

(प्रविश्यालोक्य च ।)

**शण्डः** - अयं महाराजस्तावदुपसर्पामि । (इति उपसृत्य ।) दैत्येन्द्र दिष्ट्या वर्धसे देव्युदरदुग्धोदधितः पुत्रेन्दूदयेन ।

**हिरण्यकशिपुः** - (साह्लादसम्भ्रममुत्थाय ।) गुरुपुत्र प्रणमामि ।

**शण्डः** - (हस्तमुदस्य ।) वंशवृद्धिरस्तु ।

**हिरण्यकशिपुः** - गुरुपुत्रैतदासनमलङ्कुरु ।

**शण्डः** - (तथा करोति ।)

**हिरण्यकशिपुः** - (सिंहासन उपविश्य । किञ्चित् सलज्जं सानन्दम् ।) गुरुपुत्र कीदृशोऽयमर्भको भविता ।

**शण्डः** - (स्वगतम् ।) हन्त ग्रहसूचितं पितृनाशकत्वं भगवद्भक्तत्वं च कथं कथयामि कथमतथ्यमपि वदामि । भवतु वाग्वैदग्ध्यं करोमि । (प्रकाशम्) अयं किल ।

**स्वास्थ्यं विधाता त्वयि दैत्यवर्गे**
**प्रतापवानुत्तममार्गवर्ती ।।**
**ज्ञानी नयाब्धिर्विपुलायुरस्ति**
**तवात्मजो वंशधरो बलिष्ठः ।।२४।।**

**हिरण्यकशिपुः** - (सानन्दम् ।) अयं गुरुचरणानां कृपाप्रभावः ।

**शण्डः** - तत्रापि भवद्भक्तिरेव कारणम् ।

**विद्युद्दंष्ट्रः** - एवमेव ।

**शण्डः** - राजन् गच्छाम्यानन्दजनकं वृत्तान्तं गुरुचरणान् कथयितुम् । (इति निष्क्रान्तः ।)

**हिरण्यकशिपुः** - भद्र विद्युद्दंष्ट्र

**दातव्यान्याभरणान्यम्बरसहितानि याचकेभ्यश्च ।।**
**स्वीयेभ्यः स्यन्दनगजतुरगं गावोऽर्भकस्य संवृद्ध्यै ।।२५।।**

**तोरणमुकुरपताकाकदलीभिर्वेश्मसङ्घमत्युच्चैः ।।**
**सम्मार्जनचन्दनवाःसेकैर्मार्गान् विभूषय त्वं द्राक् ।।२६।।**

किञ्च ।

**वाद्यान्यम्बरगानां भौमानां संसृजन्तु निध्वानम् ।।**
**श्रुतिसुखदं समयेऽस्मिन्वह्नेर्यन्त्राणि दुर्गसंस्थानि ।।२७।।**

**विद्युद्दंष्ट्रः** - (ससम्भ्रमाह्लादम् ।) यदाज्ञापयति देवः । कः कोऽत्र भोः ।

(प्रविश्य ।)

**दौवारिकः** - जयतु जयतु देवः । कः नियोगः ।

**विद्युद्दंष्ट्रः** - आकारय तावत्कोशाधीशम् ।

**दौवारिकः** - (निष्क्रम्य कोशाधीशेन सह प्रविशति ।)

**कोशाधीशः** - (प्रविश्य ।) विजयतां महाराजः किमनुष्ठेयं मया ।

(तदन्तरे ।)

**विद्युद्दंष्ट्रः** - भद्र कुमारजननोत्सवपारितोषिकाणि दातुमानय वस्त्राभरणादीनि ।

**कोशाधीशः** - (ससम्भ्रमाह्लादम् । निष्क्रम्य वस्त्राभरणादिपात्रवाहकैः परिजनैः सह प्रविश्य हिरण्यकशिपोः पुरःप्रदेशे स्थापयति ।)

**हिरण्यकशिपुः** - (सहर्षम् । विद्युद्दंष्ट्रप्रभृतिभ्यो मुख्येभ्यो वस्त्राभरणानि ददाति ।)

**ते सर्वेऽपि** - महाप्रसादः । (इति सानन्दं धारयन्ति ।)

**हिरण्यकशिपुः -** भद्र विद्युद्दंष्ट्र अन्येभ्यः सर्वेभ्यस्त्वमेव देहि ।

**विद्युद्दंष्ट्रः** - देवादेशः प्रमाणम् । (इति सानन्दं तथा करोति । ततोऽञ्जलिं बद्ध्वा ।)
देव भवदाज्ञप्तमन्यदपि कृत्यं निर्वर्त्तयितुं गच्छामि ।

(इति निष्क्रान्तः ।)

(ततः प्रविशति शण्डामर्काभ्यामनुगम्यमानः शुक्रः ।)

**शुक्रः** - (प्रविश्य । सर्वतोऽवलोक्य । श्रवणमभिनीय ।)

**दुर्गस्थानलयन्त्रवर्त्तिचपलासद्धूममेघाः पुनस्-**
**तद्घोषस्तनितानि च क्षितिपतेः संसूचयन्त्यादितः ।।**

**सत्पुत्रोदयवृष्टिकालमधुनाऽऽह्लादाम्बुसंवर्षुकं**
**स्वानां तापहरं वनीयकमयूराणां गिरां वर्धकम् ।।२८।।**

(पदान्तरं गत्वा ।)

**नव्याम्रपर्णतोरणमाला गोपुरपुरःप्रबद्धेयम् ।।**
**किमु पत्तनेन विधृता गारुत्मतनिष्कमालिकाऽऽनन्दात् ।।२९।।**

(पुनः पदान्तरं गत्वा ।)

इदं गोपुरं तावत्प्रविशामि । (इति प्रवेशं नाटयन् श्रवणमभिनीय ।)

**पुटभेदनपेटीपुटनिभृतं पुत्रोत्सवाख्यसद्रत्नम् ।।**
**संसूचयत्ययं मे मङ्गलवाद्यध्वनिः पिशुनः ।।३०।।**

(पुनः पदान्तरं गत्वा सर्वतोऽवलोक्य सानन्दम् ।)

**विरजस्काश्चन्दनजलसिक्ता मार्गा दिशन्ति दृक्सौख्यम् ।।**
**आदर्शांशुकतोरणकदलीयुक्तानि पण्यवेश्मानि ।।३१।।**

किञ्च । पौराः ।

**रत्नाभरणवराम्बरपरिष्कृता यक्षकर्दमालिप्ताः ।।**
**ध्वजपटचोरिततपनातपतापेऽस्मिन्पुरे चरन्त्युत्काः ।।३२।।**

(पुनः पुरो गत्वाऽवलोक्य च ।)

**चामीकररत्नाम्बरभूषितगजरथतुरङ्गपादचरम् ।।**
**धृतमाल्यं सामोदं सामोदं मानसं भृशं तनुते ।।३३।।**

(पुनः पदान्तरं गत्वा ।) इदं नन्द्यावर्तद्वारम् । तावत् प्रविशामि । (इति प्रवेशं नाटयन् । श्रवणसुखमभिनीय ।)

**सङ्गीतं श्रुतिसुखकरमतिसुखयत्यपि वनप्रियं मां द्राक् ।।**
**सङ्गीतशास्त्ररीत्याऽऽकलितं वाद्येन वारकान्तानाम् ।।३४।।**

(पुनः पदान्तरं गत्वा ।) अयं हिरण्यकशिपुः सपरिवारस्तिष्ठति तदुपसर्पामि । (इति उपसृत्य । साह्लादम् ।) राजन् दिष्ट्या वर्धसे सत्पुत्रलाभेन ।

**हिरण्यकशिपुः** - (ससम्भ्रमाह्लादम् । उत्थाय तत्पादयोः प्रणमति ।)

**शुक्रः** - सद्वंशवृद्धिरस्तु । वत्स उत्तिष्ठ परिपूर्णमनोरथोऽसि ।

**हिरण्यकशिपुः** - सर्वं भवत्कृपाकटाक्षक्षितिरुहस्य फलम् । (इत्युत्थाय ।) गुरुपुत्रौ प्रणमामि ।

**उभौ** - वंशवृद्धिरस्तु ।

**हिरण्यकशिपुः** - भगवन् पुत्राभ्यामलङ्क्रियतामिदमासनम् ।

**शुक्रः** - (तथा करोति ।)

**हिरण्यकशिपुः** - कः कोऽत्र भोः आनीयतां पूजोपकरणम् ।

(प्रविश्य ।)

**परिजनः** - महाराज सज्जमिदं पूजोपकरणम् ।

**हिरण्यकशिपुः** - (सभक्त्यानन्दम् । सपुत्रस्य तस्य पूजां करोति ।)

**शुक्रः** - राजन्नलङ्कुरु स्वसिंहासनम् ।

**हिरण्यकशिपुः** - (प्रणम्य तथा करोति ।)

**शुक्रः** -

**सत्पुत्राख्यसुधांशूदयसंवृद्धान्ववायदुग्धाब्धिम् ।।**

**दर्शं दर्शं त्वाप्तुं दृक्सुखमाशास्महे वयं नित्यम् ।।३५।।**

**हिरण्यकशिपुः -** (सविनयम् ।)

**नैसर्गिककरुणामृतजलद त्वच्चिन्तनप्रभावेण ।।**
**भविता सौख्यमहीरुह उच्चैः शीघ्रं फलप्रसूनाढ्यः ।।३६।।**

**विद्युद्दंष्ट्रः** - भगवन् यथाह महाराजस्तथैव ।

**शण्डः** - तत्रापि महाराजानन्यभक्तिवर्षर्तुरेव कारणम् ।

**शुक्रः** - यथाह शण्डस्तथैव । यतः ।

**त एव जलदाः सन्ति स एवाब्धिः पयःप्रदः ।।**
**तथापि खलु वर्षर्तुः कारणं वृष्टिपोषयोः ।।३७।।**

**हिरण्यकशिपुः -**

**निसर्गतः पोषकाश्चामृतदाः साधवोऽम्बुदाः ।।**
**समास्तापहरास्तेषु पूर्वोक्ता नित्यमीदृशः ।।३८।।**

भगवन्मया यथैवानुभूतं तथैवोक्तं न तु प्रशंसा । यतः ।

**निसर्गक्रूरोऽहं विधिविहितकार्ये न निरतो**
**न वा त्वच्छुश्रूषाशुभजनककर्मण्यपि रतः ।।**
**तथापि ज्ञात्वा मामधममपि भो भार्गव गुरो**
**विधत्से त्वं नित्यं दनुजजनतायाश्च मम शम् ।।३९।।**

**शुक्रः** -

**अक्रूरत्वं च कर्मित्वं न भक्तेः कारणं परम् ।।**
**बहिःकार्यरतस्यापि चित्तशुद्धिर्हि तत्किल ।।४०।।**

**शण्डः** - सिद्धान्तमाह तातः ।

(ततः प्रविशति प्रसूतिकावेषधरा पर्यङ्कस्था कयाधुश्चेटी कञ्चुकी च ।)

(प्रविश्य ।)

**चेटी** - भद्र कञ्चुकिन्पुत्रमुखेन्दुदर्शनाय प्रार्थनीयः खलु महाराजः ।

**कञ्चुकी** - (सानन्दम् ।) हुं गच्छामि (इति नाट्येन प्रसर्पति ।) (पदान्तरं गत्वा ।) इदं सभास्थलम् अयं महाराजस्तदुपसर्पामि । (इति उपसृत्य ।) जयतु जयतु महाराजः । भवद्धृद्यानन्दोदधिवर्धकं पुत्रमुखेन्दुमवलोकयितुं प्रार्थयतेऽन्तःपुरिकाजनः ।

**हिरण्यकशिपुः** - (किञ्चित्सलज्जास्मितं गुरोर्मुखमवलोकयति ।)

**शण्डः** - (सानन्दम् ।)

**दिष्ट्या क्षणोऽयं समुपागतोऽद्य**
**तेनाऽतिनन्दामि भृशं मुहुस्त्वम् ।।**

**शुभं हि शीघ्रं कुरु दैत्यवर्य....**

**हिरण्यकशिपुः** - (सानन्दम् ।)

**....यथा भवानाह तथा करोमि ।।४१।।**

**परं भवद्धस्तपलाशरम्यच् -**
**छाया भवत्वर्भकमूर्द्धिन भूमन् ।।**

**इत्थं समिच्छामि ....**

**शण्डः** - **....तथैव योग्यं....**

**शुक्रः** - (साह्लादम् ।)

**....ममात्यभीष्टं समुदाहृतं ते ।।४२।।**

(इति सर्वेऽपि उत्तिष्ठन्ति ।)

(हिरण्यकशिपुः सपुत्रो गुरुश्च गमनोद्योगं नाटयतः ।)

**हिरण्यकशिपुः** - कञ्चुकिन् दर्शय तावत्सूतिकागृहस्य मार्गम् ।

**कञ्चुकी** - महाराज इत इतः ।

**चेटी** - देवि देहि मद्धस्तयोः कुमारम् ।

**कयाधुः** - हञ्जे किमिति ।

**चेटी** - सम्प्राप्तो महाराजस्यागमनावसरः ।

**कयाधुः** - किमर्थमागच्छति महाराजः ।

**चेटी** - देवि कुमारमुखेन्दुदर्शनाय ।

**कयाधुः** - कथं ज्ञातम् ।

**चेटी** - देव्येतदर्थं पूर्वमेव कञ्चुकी मया प्रेषितः ।

**कयाधुः** - (कृच्छ्रादुत्थाय सश्रमखेदं सक्रोधमिव ।) हञ्जे कस्तेऽयं त्वरास्वभावः । किं क्वापि पलायतेऽयमर्भकः ।

**चेटी** - (सस्मितम् ।) देवि मम दैवद्रुमसत्फलपरिपाकवशादेतदपि सत्वरमेव भविष्यति ।

**कयाधुः** - (सक्रोधमिव सस्मितं तूष्णीं तत्करयोः कुमारमर्पयति ।)

**चेटी** - (साह्लादं सवस्त्रं गृह्णाति ।) (प्रह्लादो बालभाववशादानन्दजनकं रोदिति ।)

**चेटी** - (लालयन्तीतस्ततः परिभ्रमति ।)

**कयाधुः** - (सतृष्णमवलोकयति ।)

**कञ्चुकी** - (पदान्तरं गत्वा ।) इदमन्तःपुरद्वारं तत्प्रविशतु महाराजः ।

(इति सर्वेऽपि प्रवेशं नाटयन्ति ।)

(पुनः पदान्तरं गत्वा ।)

**कञ्चुकी** - इदं सूतिकागृहं तदुपसर्पतु महाराजः । (इति स्वयं तत्रैव तिष्ठति ।)

(ते सर्वेऽपि तत्र गच्छन्ति ।)

**शुक्रः** -

**कवोष्णश्चौषधीनां च गन्धैर्मिश्रः समीरणः ।।**
**सूतिकागृहसामीप्यं सूचयत्येष सौख्यदः ।।४३।।**

**शण्डः** - (आघ्राणमभिनीय ।) हुं तथैव ।

**हिरण्यकशिपुः** - (आघ्राणमभिनीय तूष्णीं चलति ।)

**शुक्रः** - (पदान्तरं गत्वा । सानन्दसम्भ्रमम् ।) राजन्नियं मदनिका कुमारं लालयन्तीतस्ततः प्रसर्पति ।

**शण्डः** - (सानन्दस्मितम् ।) हुं तथैव ।

**चेटी** - (सर्वांस्तानवलोक्य सहर्षं गुरोश्चरणयोरुपकण्ठे स्थापयति ।)

**शुक्रः** - (सानन्दाश्रु हस्तेन कुमारस्य शिरः परिमृश्य ।) चिरञ्जीवी सन्मार्गवर्ती च भव । (पुनर्निपुणमवलोक्य ।)

**राजन् प्रह्लादजनकोऽर्भकोऽयं तेन हेतुना ।।**
**प्रह्लाद इति विख्यातो नूनं लोके भविष्यति ।।४४।।**

**शण्डः** - हुं युक्तमभिहितम् ।

**हिरण्यकशिपुः** - (सानन्दम् ।) यथा गुरुचरणानामाज्ञा तथैव भविता । (इति प्रणमति ।) चेटि कारय तावद्गुरुचरणयोः स्पर्शम् ।

**चेटी** - (तथा कृत्वा हिरण्यकशिपोश्चरणोपकण्ठेऽर्पयति ।)

**हिरण्यकशिपुः** - (सानन्दम् । हस्तेन तन्मस्तकमभिमृश्य मनस्येवाशिषं प्रयुज्य ।) चेटि नय तावद्गुरुपुत्रयोश्चरणोपकण्ठे ।

**चेटी** - (तथा करोति ।)

**उभौ** - चिरञ्जीवी सन्मार्गवर्ती च भव ।

**चेटी** - (पुनः करयोर्धृत्वा लालयन्ती निपुणं निरीक्ष्य । सानन्दम् ।) गुरुपुत्र पश्य मुखेनायमस्माकं देवीमनुकरोति ।

**शण्डः** - (निपुणं निरीक्ष्य । सानन्दस्मितम् ।) हुं देवीमेवानुकरोत्यास्येन । (पुनर्निपुणं निरीक्ष्य ।) चेटि पश्य पश्य उरःस्थलेन कट्या चास्मन्महाराजमनुकरोति । (इत्यङ्गुष्ठतर्जनीभ्यां तं कपोलयोः स्पृशति ।)

**चेटी** - (सस्मितम् ।) हुं महाराजमेवानुकरोति ।

**शुक्रः** - (निपुणं निरीक्ष्य । सानन्दस्मितम् ।) भुजचरणेन पितृव्यमनुकरोति । पश्यतु महाराजः ।

**हिरण्यकशिपुः** - (सस्मितम् । तूष्णीं तिष्ठति ।)

**उभौ चेटी च** - हुं तथैव ।

**शुक्रः** - सर्वाण्यपि शुभचिह्नानि मन्मानसमानन्दयन्ति ।

**चेटी** - (सस्मितम् ।) स्वकीयानां निसर्ग एवायम् । एतत्सर्वं भवत्कृपामहीरुहस्यैव स्वादुफलम् ।

**हिरण्यकशिपुः** - साधु चेटि साधु यथोचितमेवाभिहितम् ।

(नेपथ्ये शङ्खध्वनिः ।)

(श्रुत्वा ।)

**शुक्रः** - किं सम्प्राप्तः सन्ध्यावसरः । (आकाशे दत्तदृष्टिः ।) भगवान् सहस्रकरोऽपि सायंसन्ध्यां निर्वर्त्तयितुमिव भजते पश्चिमार्णवम् ।

**शण्डः** - हुं तथैव ।

**हिरण्यकशिपुः** - प्राचीमभिवीक्ष्य ।

**यदपि रसाधिपपतिका क्षीणवसावस्तमागते मित्रे ।।**
**रागवतीति दिशेयं प्रेम्णः सीमा प्रतीचिका नूनम् ।।४५।।**

**शण्डः** - राजन् सम्यगुत्प्रेक्षितम् ।

**शुक्रः** - राजन् सम्प्राप्तः सन्ध्यावसरस्तद्गन्तुमिच्छामि ।

(इति पुत्राभ्यां निष्क्रान्तः ।)

**हिरण्यकशिपुः** - (पदान्तरं गत्वा ।) कञ्चुकिन् दर्शय तावत्सभास्थलस्य मार्गम् ।

**कञ्चुकी** - इत इतः । (इति पुरः प्रसर्पति ।) (पदान्तरं गत्वा ।) इदं सभास्थलम् इदं सिंहासनं तदलङ्करोतु महाराजः ।

**हिरण्यकशिपुः** - (तथा करोति ।)

(प्रविश्य पटाक्षेपेण ।)

**विद्युद्दंष्ट्रः** - जयतु जयतु महाराजः । निर्वर्तितं किलाज्ञानुरूपं कार्यम् ।

**हिरण्यकशिपुः** - साधु भद्र साधु मदाज्ञानुवशादतिश्रान्तोऽसि ।

**विद्युद्दंष्ट्रः** - देव आनन्दजनके कर्मणि विशेषतो भवदाज्ञया कीदृशोऽस्माकं श्रमः साम्प्रतं धन्योऽहमस्मि चिराभिलषितेन सम्प्राप्तेनावसरेण ।

**हिरण्यकशिपुः** - (सानन्दम् ।) भद्र साधु भणसि । स्वस्थानमलङ्कुरु ।

**विद्युद्दंष्ट्रः** - (सविनयं तथा करोति ।)

**हिरण्यकशिपुः** - (ऊद्ध्र्वमवलोक्य ।) भद्र पश्य पश्य

**ताराबुद्बुदकलितध्वान्तस्नेहे वियद्बृहत्पात्रे ।।**
**चन्द्रोद्दीपो रचितो मार्गे ज्योत्स्नाभिसारिकासुखदः ।।४६।।**

**विद्युद्दंष्ट्रः** - (ऊद्ध्र्वमवलोक्य ।) यथाह महाराजस्तथैव ।

**हिरण्यकशिपुः** - (पुनरूद्ध्र्वमवलोक्य ।) भद्र पश्य पश्य ।

जगदानन्दकन्दं चन्द्रं जलधरा मलिनीकुर्वन्ति परमहं तावदेवं मन्ये ।

**नीतोऽनेन मदंश एव जलधेरुड्डीय गंत्रा चिरं**
**चोरेण द्विजपेन नीरदमिषात् पङ्कोऽयमुच्चस्थितम् ।।**
**इत्यासारगुणोच्चयाप्तगतिकः शून्ये कलङ्काविलं**
**ताराप्तं मलिनीकरोति स रुषा तं साम्बरं साम्प्रतम् ।।४७।।**

(पुनर्विद्युतमवलोक्य स्तनितश्रवणमभिनीय ।) भद्र शृणु ।

**दृष्ट्वा लाञ्छनमिन्दुमध्यपतितं मत्वा स्वकीयार्भकं**
**नीतं तद्द्विजराजकेन तमिमं शून्ये भ्रमन्तं क्रुधा ।।**
**मेघा गर्जनसर्जनैः स्वसमये विद्युत्करालासिना**
**तर्जन्तो जलजालमन्दगतयो नोच्चङ्गताः साम्प्रतम् ।।४८।।**

**विद्युद्दंष्ट्रः** - यथार्थमुत्प्रेक्षितं महाराजेन ।

(पटाक्षेपेण प्रविश्य ।)

**कञ्चुकी** - जयतु जयतु देवः । सज्जं शयनोचितं साहित्यम् ।

**हिरण्यकशिपुः** - भद्र समयोचितमावेदितम् । भद्र विद्युद्दंष्ट्र शयनाय गच्छामः ।

**विद्युद्दंष्ट्रः** - यथाभिलषितं महाराजाय ।

(इति निष्क्रान्ताः सर्वे ।)

**।। इति श्रीनृसिंहविजयनाम्नि महानाटके प्रह्लादोत्पत्तिर्नाम सप्तमोऽङ्कः ।।**